५ से ८ [illegible] पत्र नहीं हैं।

पत्र [illegible] नहीं हैं।

बृहत्स्तवार्थसंग्रहः

श्रीमते रामानुजाय नमः ॥ प्रणौमि श्री हयग्रीवं प्रज्ञाना
रूपाद्दपेप्रज्ञाप भुपती यस्यप्रसादेन जगत्पती ॥१॥ श्रीशठारि
गुरुं नत्वा तदनुग्रहलब्धधीः ॥ करोति शठजिद्योगी ब्रह्म
सूत्रार्थसंग्रहं ॥२॥ अथातो ब्रह्मजिज्ञासा ॥ विधिनाधी
तवेदानां पूर्वकर्मविबोधतः ॥ पश्चाद्वेदांतवेद्यस्य जिज्ञा
सा ब्रह्मणो भवेत् ॥१॥ जन्माद्यस्य यतः ॥ अस्याशेषप्रपं द्रु
चस्य जन्मस्थितिलयाद्यतः ॥ सर्वज्ञात् सर्वशक्तेस्तद्ब्रह्म
ज्ञेयं मुमुक्षुभिः परा शास्त्रयोनित्वात् ॥ अशेषवेदके
दे लोकेऽजीवविलक्षणं तत् ब्रह्म वेददीपेन भासते ना
नुमानतः ॥३॥ तत्तु समन्वयात् ॥ प्रवृत्तेश्च निवृत्तेरप्य
प्रोक्तरतया श्रुतं ॥ तत्स्वतः पुरुषार्थत्वाज्ज्ञातव्यमपव

हित्वश्रुतं परमात्मानः ॥८॥ ज्योतिश्चरणाभिधानात् ॥
ज्योतिःशब्देन गायत्रीशब्देन च जगत्पतिः ॥ उच्यते सर्व
भूतानां तत्पादत्वावधारणात् ॥१०॥ प्राणस्तथानुगमात् ॥
प्राणश्चचित्तसहितो जीवैरिंद्रादिभिर्युतैः ॥ ईश्वरश्च
स्वतंत्रेच्छाज्ञातव्यो यं मुमुक्षुभिः ॥११॥ इति ब्रह्मसूत्रार्थसं
ग्रहे प्रथमस्याध्यायस्य प्रथमः पादः ॥१॥ सर्वत्रप्रसिद्धो
पदेशात् ॥ मनोरूपः सत्यकामश्च सत्यसंकल्प ईश्वरः ॥ ननु
जीवेन खल्वस्य सत्यसंकल्पतोचिता ॥१॥ अत्ता चराच
रग्रहणात् ॥ मृत्यूपसेचनब्रह्मक्षत्रादिजगदोदनः ॥
गुहां प्रविष्टो जीवेन सहितोप्यमलः स्वतः ॥२॥ अंतरउपप
त्तेः ॥ अक्ष्यंतरस्थ संयुक्तोप्यमितेन सुखेन यः ॥ अस्थिरादि

२

गंद्वानंद्वाइ क्षते नौंशद्धं ॥ स देकं मा द्वितीयं प्राग बहुस्यां मीक्षते तित ॥ इति श्रुतवी क्षितृत्वात् सदात्मा न त्वचेतनं ॥५॥ आनंदमयोऽभ्यासात् ॥ श्रुतः शतगुणानंदो यस्या नंदात्प्रजायते ॥ स जीवादन्य एव स्यादनंतः सर्वलोक कृत ॥६॥ अंतस्तद्धर्मोपदेशात् ॥ आदित्ये पुंडरीकाक्षः पुरुषो यो हिरण्मयः स स्यात् परोऽन्य एव शः सर्वपाप विवर्जनात् ॥७॥ आकाशस्तल्लिंगात् ॥ यस्मादशेषभू तानामुत्पत्तिप्रलयौ श्रुतौ ॥ आकाशस्तु सर्वेशो मता कोशविलक्षणतः ॥८॥ अत एव प्राणः ॥ सर्वेकारतामावेन श्रुयमाणः परः प्रमानतः ॥ अत एव कारणत्वं

२

ब्रह्म सुखवत्त्वाश्रुतर्भूमा परः पुमान् ॥ प्राणशब्दोक्तजीवादप्यधि
कत्वेन वर्णनात् ॥२॥ अक्षरमंबरांतधृतेः ॥ ओतं यत्र ज
गत्सर्वमाकाशांतं तदक्षरं ॥ ब्रह्मैव चंद्रसूर्यादिसर्व
जीवप्रशासनात् ॥३॥ ईक्षतिकर्मव्यपदेशात्सः ॥ ईक्षि
ते जीवघनतः परात्परमिति श्रुतेः ॥ प्रणवेन त्रिमात्रे

३ ण ध्येयो जीवात्परः प्रभुः ॥४॥ दहर उत्तरेभ्यः ॥ हृत्पुं
डरीकमध्यस्थो दहरः परमेश्वरः ॥ तत्र आत्मा सत्य
कामो विपाप्मेत्यादिशास्त्रतः ॥५॥ शब्दादेव प्रमितः ॥
अंगुष्ठमात्रपुरुषः परमात्मा हृदि स्थितः ॥ ईशानो भूत
भव्यस्येत्यसाधारणशब्दतः ॥६॥ तदुपर्यपि बादराय
णः संभवात् ॥७॥ ईश्वरोपासनं देवेष्वपि देहादिसं

ग।तेप्राप्यो न जीवः किंतु विश्वकृत।।३।। अंतर्याम्यधिदैवादिलो
कादिषु तद्धर्मव्यपदेशात्।।पृथिव्याद्यात्मपर्यंताशेषांतर्यामिमा
वतः श्रुतः स परमात्मैव न जीवो नाप्यचेतनं।।४।। अदृश्यत्वादि
गुणको धर्मोक्तेः।।यतद्द्रश्यमित्यादिश्रुत्युक्तः परमेश्वरः।।
अग्राह्यो ह्यमनाः शुभ्र इति जीवान्यताश्रुतेः।।५।।वैश्वानर
साधारणशब्दविशेषात्।।वैश्वानरात्मा सर्वेशो द्युमूर्द्धत्वा
दियोगतः।।उपासकानुग्रहार्थमभिव्यक्तश्च मानसे।।६।।
इति ब्रह्मसूत्रार्थसंग्रहे प्रथमस्याध्यायस्य द्वितीयः पादः।।
।।२।। द्युभ्वाद्यायतनं स्वशब्दात्।।यस्मिन्नोतमिदं सर्वं द्यु
पृथिव्यादिकं जगत्।।स जीवादन्य एवात्मा मुक्तप्राप्यत्वकी
र्तनात्।।१।। भूमा संप्रसादादध्युपदेशात्।।अपरिच्छि

ष्टः॥३॥ आनुमानिकमप्येकेषामिति चेन्न शरीररूपक
विन्यस्तगृहीतेर्दर्शयति च॥ आत्मशब्दोदिता जीवाद्य
क्तपदगोचरात्॥ सूक्ष्मं गाम्यपरो विष्णुः पुरुषः श्रु
तितोमितः॥१॥ चमसवदविशेषात्॥ रक्तशुक्लकासि
तामेकामजामित्यादिवेदतः॥ स्वतंत्राप्रकृतिर्नोक्ता किं
तु सा पारमेश्वरी॥२॥ न संख्योपसंग्रहादपि नानाभा
वादतिरेकाच्च॥ प्राणस्य चक्षुषः श्रोत्रस्यान्नस्य मन
सश्च यः॥ आधारो गगनस्यापि स जीवादधिको वि
भुः॥३॥ कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः॥
सत्यज्ञानात्मशब्दोक्तमसदेवेदमित्यपि॥ श्रूयते तेन
वेदान्तेष्वर्थभेदो न विद्यते॥४॥ जगद्वाचित्वात्॥ य

मवात्॥ तेषां च वाचकाः शब्दा नित्याः पश्वादिशब्दवत्॥७॥
मध्वादिष्वसंभवादनधिकारं जैमिनिः॥ देवत्वार्थं देव
भोग्यमप्युक्ते नरवैः स्प्रतो॥ देवानामप्यधिकृतिः पुनश्चा
मरते च्छ्रयात्॥८॥ शुगस्य तदनादरश्रवणात्तदाद्रवणात्सू
च्यते हि॥ शूद्रस्तु वेदशून्यत्वान्न ब्रह्मोपासनक्षमः॥
शूद्रत्वं मन्त्रितो वै देश्च त्रियः शोकयोगतः॥९॥ कंपनात्॥
वज्रादिबोच्चता भीता यस्मादस्याद्यसुराः स प्राणशब्द
निर्दिष्टो ज्ञातव्यः परमेश्वरः॥१०॥ आकाशोऽर्थान्तरत्वा
दिव्यपदेशात्॥ प्रस्पष्टो नामरूपाभ्यामाकाशः परमे
श्वरः॥ सुषुप्तावपि चोत्क्रान्तो जीवाद्भेदेन विश्रुतः॥११॥
इति ब्रह्मसूत्रार्थसंग्रहे प्रथमस्याध्यायस्य तृतीयः पा

स्यावरोहक्रमोपथा ॥८॥ अंतरा विज्ञानमन
सा क्रमेणतल्लिंगादिति चेन्नाविशेषात् ॥
भूतातो मंतराले स्याद्बुद्धिर्मनसो ज्ञनि:
अश्रुतेर्वादेतो भूतोत्पत्तिक्रमः सममत्र ततः ॥१५॥
चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्त
स्तद्भावभावित्वात् ॥ जातो जीवो मृतो जीव इ
ति लौकिकवेदयोः ॥ चराचरशरीरेषु मुख्या
गौणी तु चेतने ॥१६॥ नात्माश्रुतेर्नित्यत्वा
च्च ताभ्यः ॥ उत्पत्तिर्नास्ति जीवस्य व्योमादि
दीनामिव श्रुतेः ॥ ब्रह्मवन्नित्य एवायमतो
नित्य इति श्रुतेः ॥१७॥ ज्ञोत एव ॥ नित्यचैतन्य ए
वायं स्वयं ज्योतिरिति श्रुतेः ॥ विज्ञातु र्नहि

श्रुतेः॥ सन्नूलं सर्वमित्युक्तिं चैतन्मूलं दधीति
वेत्॥४॥ आपः॥ अपां च तेजसः साथाद्गने
राप इति श्रुतेः॥ तेजसोऽत्र लवंशलादासा
ऋष्यजन्मता॥५॥ पृथिवी॥ प्रजन्यत्वेन प
श्रोकं गत्र पंचको गन्धावयतः॥ तदेवं पृथिवी
शब्दालस्पादियोगतः॥६॥ बुद्धिध्यानो
देवतत्त्वमितः मात॥ इच्छारूपोव संकल्पादि
य श्चायुभिर्वारिमिः॥ तिन्नेलायोष्ठि जायते
तस्यांतर्याभिता श्रुतेः॥८॥ विपर्ययस्तत्त्व
मीतत्वप्रपद्यते च॥ स्वगकिमात्स्यादितोनो
विपरीतोलयक्रमः॥ ६॥ एरीहराक्षमादधं

श्रुतेः॥१६॥ अदृश्यानियमात्॥ अग्निसंध्यादिनियमो
ऽदृष्टनियमात्तथा॥ अस्यात्मभेदो नियमो न स्यादन्य
थाक्कचित्॥१७॥ इति ब्रह्मसूत्रार्थसंग्रहे द्वितीयस्या
ध्यायस्य तृतीयः पादः॥३॥ तथा प्राणाः॥ ब्रह्मतो वि
यदादीनां यथोत्पत्तिः श्रुता तथा॥ प्राणानां च पुरा स
र्गात्तत्प्रवचनं श्रुतेः॥१॥ सप्तगतेर्विशेषितत्वाच्च॥
प्राणसंज्ञानि करणान्येकादश निरूपणात्॥ दशेमे
पुरुषे प्राणा आत्मैकादश इत्यतः॥२॥ अणवश्च॥
अणवस्ते विभुत्वं च पेक्षानुक्रान्त्ययोगतः॥ अदर्श
नं च पार्श्वस्थैः स्थूलत्वे नोपपद्यते॥३॥ श्रेष्ठश्च॥
मुख्यप्राणस्य चोत्पत्तिः स्यात्प्राणानां विशेषतः॥ अन

विज्ञाते लोपइत्यपि शङ्कतः ॥१२॥ उत्क्रान्तिगत्यागतीनां ॥
अणुर्जीवोस्य गत्यादिश्रवणान्नान्यथा श्रुतेः ॥ देहव्याप्ति
र्गुणैर्नास्य विज्ञानेनोपपद्यते ॥१३॥ कर्ता शास्त्रार्थव
त्त्वात् ॥ कर्तृत्वं चास्य नियतं न तु बुद्ध्याद्युपाधितः ॥
अन्यथा मोक्षशास्त्रस्याप्यानर्थक्यप्रसंगतः ॥१४॥
परात्तु तच्छ्रुतेः ॥ जीवं कारयतीशस्तु स्वातंत्र्यमितो
श्रुतेः ॥ जीवकर्तृत्वसापेक्षः प्रभुः कारयिता स नः ॥
॥१५॥ अंशो नानाव्यपदेशादन्यथा चापि दाशकित
वादित्वमधीयत एके ॥ आलोकादिर्यथा क्रीडेरंश
स्तद्वत्परात्मनः विज्ञाता मा प्रकारत्वाद्भेदस्यान्यस्य च

११

नैजोवत्रानां हरिरेव हि॥ न ब्रह्मानामरूपत्वे व्यापिकं

कस्यचित्क्वचित्॥८॥ इति श्रीब्रह्मसूत्रार्थसंग्रहे द्वि

तीयस्याध्यायस्य चतुर्थपादः॥ ॥ तदंतरप्रतिपत्तौ रं

हति संपरिष्वक्तः प्रश्ननिरूपणाभ्यां॥ जीवो देहां

७ तरं भूतैः परिष्वक्तो ज्ञः प्राप्य गच्छति॥ श्रद्धेदनभुकालो

युमेघान्नरांगनाः॥१॥ कृतात्यये नुशयवान् दृष्ट

स्मृतिभ्यां यथेतमनेवं च॥ उपालक्ष्य कर्मभोगांते स्व

र्गाज्जीवोऽवरोहति॥ शेषयुक्तो यथारूढोऽपूर्मेना

नैतन्यान्यथा॥२॥ अनिष्टादिकारिणामपि च श्रुतौ॥

वेदोक्तकर्मशून्यानां न स्वर्गो नापुनर्भवः॥ तेषां तु

द्वितात्मिमुक्तिः प्रलये ब्रह्मगोचरा।।४७।। नवायुक्ति
पेद्धपगुपदेशात्।। वायो श्रेद्रिपचेष्टातः श्रेष्ठस्वन्यः
पृथक् श्रुतेः।। जीवाधीनं करणवत् पंचात्मा ह्युश्र
देहमस्तु।।५।। ज्योतिराद्यधिष्ठानं तु तदामननात् प्रा
णवताशब्दात्।। प्राणावागग्न्यादिरित्यादिशास्त्रात् देवै
रधिष्ठिताः।। स्वर्म्यादि भिन्नदेवानां भोगस्तैः किंतु दे
हिनः।।६।। तइंद्रियाणितद्व्यपदेशादन्यत्र श्रेष्ठात्।।
एकादशेंद्रियाण्यस्मात् श्रेष्ठादन्यानि भेदतः।। श्रवणा
द्यात्मशब्दोयं गौणः स्यादिंद्रियाश्रयः।।७।। संज्ञामू
र्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात्।। त्रिवृत्करणक

श्रुतत्॥१॥ तदभावो नाडीषु तच्छ्रुतेरात्मनि च॥ स्वा
पो जीवस्य नाडीषु पुरीतद्ब्रह्मतोऽपि॥ द्वाभ्यामब्रह्म
णस्तेषु प्रबोधोऽस्माच्चतः श्रुतः॥२॥ स एव तु कर्मानु
स्मृतिशब्दविधिभ्यः॥ स्वापे ब्रह्मणि लीनस्य क्षी
रे नीरवदालीनः॥ तस्यैवोत्थानमन्यस्य त्वन्यथा कर्म
च स्मृतिः॥३॥ मुग्धेऽर्द्धसंपत्तिः परिशेषात्॥ स्वप्न
जागरितस्वापमरणाव्यतिरेकतः॥ मूर्च्छा नामर्द्ध
संपत्तिः स्वापस्य मरणस्य च॥४॥ न स्थानतोऽपि प
रस्योभयलिंगं सर्वत्र हि॥ सर्वत्रावस्थितोपीशः
स्थूलसूक्ष्मशरीरवान्॥ नारूपवत्प्रधानत्वाद्बौ
द्ध्या र्क इवामलः॥५॥ प्रकृतैतावत्त्वं हि प्रतिषे

नरकास्सप्तस्थावरत्वादयस्ततः॥ तत्स्वाभाव्यापत्तिरुपपत्तेः।
स्वर्गतोथ च भोगान्ते शीतांशोरवरोहतः॥ आकाश
वायुधूमाभ्रवृष्टिसाम्यं क्रमाद्भवेत्॥५॥ नातिचिरे
ण विशेषात्॥ आकाशादिषु वृष्ट्यन्तेष्वल्पं चैव वसन्
पतेत्॥ कालं जीवो वसेद्दीर्घं व्रीह्यादिषु तथा श्रुतेः॥
॥५॥ अन्याधिष्ठिते पूर्ववदभिलापात्॥ व्रीह्यादि
षु न भोगोस्य व्योमादिष्विव नन्वसन्॥ कमैतद्धिहि
तं भुक्त्वा योनिं प्राप्याथ देहितां॥६॥ इति श्रीब्रह्मसू
त्रार्थसंग्रहे तृतीयस्याध्यायस्य प्रथमपादः॥१॥ सं
ध्ये सृष्टिराह हि॥ सृष्टिरीशकृता स्वप्ने मायाबाधा
च्छुभाशुभौ॥ जीवस्य रूपं यदीशो तस्य संसारमो

त्ययं चोदनाद्यविशेषात्॥ उक्तं सर्वेषु वेदान्तेष्वेकं विमोक्षो
पासनं। प्राणादीनां च विकारव्याप्त्यैक्यादग्निहोत्रवत्॥१॥
उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च॥२॥ शाखांतरोदि
तोपासागुणाः शाखांतरोदिते। उपासने च गुणाः स्यादेवं स
मग्निधर्मवत्॥२॥ अन्यथात्वं शब्दादिति चेन्नाविशेषात्॥
उक्तं श्रुतौ प्राणाधीः स्यात्तदन्ते प्राणाहुतिः॥ परोवरीयसो
हेमश्मश्रोरवियथा मतिः॥३॥ व्याप्तेश्च समंजसं॥ उद्गी
थं प्रणवं ध्यायेदित्यत्रैक्यापवादयोः॥ अध्यासस्याप्यपु
तोऽस्तुद्गीथोक्षरभेदकः॥४॥ सर्वाभेदादन्यत्रेमे॥ श्रुताः
कुत्रचिदन्यत्रोप्युपास्याः प्राणोऽस्य श्रयाः॥ गुणा वसिष्ठता
मुख्याः प्रधानस्याविशेषतः॥५॥ आनंदादयः प्रधानस्य॥
आनंदादिगुणा विज्ञोः सर्वत्रैस्युरभेदतः॥ न तु प्रिया

यातितनोब्रवीतिच भूपः॥ आदर्शो नेति नेतीति प्रा
कृताकृतितुल्यता॥ निषिध्यते सर्वं विभोर्मुक्ति
ग्राह्यस्य शास्त्रतः॥ ६॥ उभयव्यपदेशात्त्वहिकुंड
लवत्॥ अहिकुंडलवत्से दो भेदो स्वे शा देहिनो॥ कि
त्वेकालोकवत्पातानथ वोपलनीलवत्॥ परमतः
सेतून्मानसंबंधव्यपदेशेभ्यः॥ सर्वस्य पारता सेतु
श्च तुल्या बुद्धिमानतः॥ स्थानभेदादिभुजिनो नाम
दन्यः परः कोपि तत्॥ ८॥ फलमत उपपत्तेः॥ ईश्वरः सर्व
शक्तिला सर्वजीवाप्य दविस्वतः॥ सर्वेषां च निर्पतबो
सर्वकर्मफलप्रदः॥ ९॥ इति श्रीब्रह्मसूत्रार्थसंग्र
हे तृतीयस्याध्यायस्य द्वितीयपादः॥ २॥ सर्ववेदान्तप्र

निश्चयोः ॥१०॥ संबंधादेवमन्यत्रापि ॥ बृहदार-
ण्यके सत्यादादित्यादिषु विशेषतः ॥ न्यैस्यै वौपनि- ९२
षदोरहश्वाहमिति द्वयोः ॥११॥ संभृति द्युव्याप्त्यपि
चातः ॥ ८ कस्यामपि शाखायां व्याप्त्यादि गुणाः कथि-
ताः ॥ श्रुताः शांडिल्यविद्यादिष्वग्राह्यस्थानतोपितः ॥१२॥
२० पुरुषविद्यायामपि चेतरेषामनाम्नानात् ॥ तांडिपैंगि
रहस्योक्तपुंविद्यातो विभिद्यते ॥ तैत्तिरीयकपुंविद्या
साम्यवादेविशेषतः ॥१३॥ वेधाद्यर्थभेदात् ॥ वेदांते
पठ्कमाम्नाता हि साध्यर्थांतराश्रिताः ॥ स्युः प्रविध्याद
यो मंत्रा नैव विद्यासु संगताः ॥१४॥ हानौ तूपायन-
शब्दशेषत्वात्कुशाः छंदस्तुत्युपगानवत्तदुक्तं ॥ हा-

दयो बुद्धि प्रवेशार्थी विलक्षणाः ॥६॥ प्राप्यानामत्र
योजनं नानात्वात् ॥ इंद्रियार्थ मनो बुद्धि जीवात्मक
परात्मसु ॥ उपास्यः परत्वैको नत्वयं तिरमूर्थवित्
॥७॥ आत्मगत्योति रितरत्व उक्तरात् ॥ ऐतरेय श्रुता
वात्मा लोकं कृत्स्नं सृष्ट्यते परः ॥ यथा सदात्मा पां देवे
तेजः प्रभृति [illegible] [illegible] तत्कृत् ॥८॥ कार्याख्यानादपू
र्वौ ॥ आत्मानमेवाग्रा तावित्सूर्वे पश्चाच्छाशान्तरेत्ततः ॥
अन्नगतः प्राण इत्यस्य वासोद्दिर्विधीयते ॥ समा
मानत्व चानेमात् ॥ शाखा भेदश्वा भेदे प्युपास्ये
क्याद भिन्नता ॥ रहदारण्यके चाग्निरहस्ये च ले

१५

माबादस्थूलत्वादयो गुणाः ।। सर्वविद्यानुवृत्ताः स्युरुपस
त्वुतदंगवत् ।।१९।। इयदामननात् ।। तं तयोर्विनावियद्
द्वासुपर्णेति वाक्यतः ।। ... एकार्थ्या ... जीवसहित
ब्रह्मोक्तया स्यादुत्तालयः ।।२०।। अंतरा भूतग्रामवत्स्वात्
मनोऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत् ।। द्वैर

११

तरालयः प्रोक्तो वेदे वाजसनेयिनां ।। श्रौतभेदास्त्वकः
स्यात्तांडिविद्योदितात्मवत् ।।२१।। व्यतिहारो विशिंषंति
हीतरवत् ।। ब्रह्मात्मनोर्विनिमयस्त्वाश्रयाश्रयिभा
वतः ।। विशिंषंति हि शाखास्ता ब्रह्मजीवसमन्वितं
।।२२।। सैव हि सत्यादयः ।। सत्याख्यः पुरुषश्चाक्षे नेत्रे
वाजसनेयके ।। हृत्सूर्ययोश्चोद्यो द्योहे मत्स्वश्रु

गमात्रे श्रुतेपि स्याद्विरुपः पुण्यपापयोः॥ प्राप्तिर्नास्य
चेन्नाम्नानात्कुशादिषु विशेषवत् ॥१५॥ सांपरायेत
र्तव्याभावात्तथाह्यन्ये॥ विरुद्धो देहपातांते कर्महानिः
केचिच्छ्रुता॥ कैश्चित्तु देवयानांते तद्योगः कर्मभे
दतः ॥१६॥ अनियमः सर्वेषामविरोधः शब्दानुमा
नाभ्यां॥ ये सत्योपासकास्तेषां सर्वेषां देवयानतः॥ ग
तिः पंचाग्निविद्यादिष्वाम्नानादविशेषतः॥१७॥ या
वदधिकारमवस्थितिराधिकारिकाणां॥ एकेनैवा
धिकारेणादेहांतरसमन्वयः॥ सख्यादीनां तदंतः
स्यात्कैवल्यनियमस्तता॥१८॥ अक्षरधियांत्ववरोधः
सामान्यतद्भावाभ्यामौपसदवत्तदुक्तं॥ अप्यरेखाविना

क्रान्तरो नाशपूर्वाच्चिवः॥ न श्वेताश्वतराधीतवै
क्यसाधकदर्शनात्॥२०॥ एवं विकल्पः प्रकरणात् सा
क्रियामानसवत्॥ ते विद्याचितएवेति सावधारणा
श्रुतेः॥ न श्रुतेरादिवद्धीनां न क्रियाशेषता क्वचि
त्॥२१॥ एक आत्मनः शरीरे भावात्॥ एकस्यात्म
22 नो देहे जातत्वाद्देहसंश्रया॥ विचेत्या कुर्णपतिपात्मा
लब्धमैथिथामति॥२२॥ अंगावबद्धास्तु न शाखासु
हि प्रतिवेदं॥ कर्मगोमीथविषयाः प्रत्ययान्यव
स्थिताः॥ प्रतिशाखं मनोदेन विद्यानादंगमन्त्रव
त्॥२३॥ मन्त्रादिवद्वाविरोधः तथा हि दर्शयति॥ वै
श्वानरस्य सांगस्य ग्राह्यतास्याद्यथा क्रतोः॥ क्रमस्त

स्तदेकता ॥२३॥ कामादीतरत्र तत्र चायतनादिभ्यः ॥
छांदोग्ये सत्यसंकल्पो वशी वाजसनेयके ॥ तत्र चात्र
गुणाभेदो हृद्वासाद्यविशेषतः ॥२४॥ उपस्थितेरत
स्तद्वचनात् ॥ उपस्थिते भोजने तु तद्धर्म्येणोपपद्यते ॥
प्राणाग्निहोत्रं नान्येन तच्च कृत्तामिति श्रुतेः ॥२५॥ त
न्निर्धारणानियमस्तद्दृष्टेः पृथग्घ्यप्रतिबंधः फलं ॥
यथा गोदोहनादीनां कर्मस्वनियमस्तथा ॥ उद्गीथा
द्यंगदृष्टीनां पृथग्गासां फलं यतः ॥२६॥ प्रदानवदे
व तदुक्तं ॥ वागादिभ्यः परः प्राणस्तद्वाय्वादिभ्यो मरु
त्परः ॥ इत्यस्योपास्यभेदः स्यात्स्वराड्राजविभेदवत् ॥२७॥
लिंगभूयस्त्वात्तद्धि बलीयस्तदपि ॥ नारायणानुवाके

इति श्री ब्रह्मसूत्रार्थसंग्रहे तृतीयस्याध्यायस्य तृतीयः पादः ॥३॥ पुरुषार्थोतः शब्दादिति बादरायणः ॥ अपि कं ब्रह्म जीवादित्युपदेशात्तदप्रया ॥ विद्यानं तु क्रियार्थी सा मोक्षदान्यासिनांच हि ॥१॥ स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥३॥ यज्ञीयादौ रसतमा श्रुतिर्विद्याविवक्षया ॥ स्यादपूर्वोपासीतेत्यादि शब्दान्न तु स्तुतिः ॥२॥ पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ आख्यानवादा वेदान्ते ख्यातविद्योपकारकाः ॥ कं मंगपारिप्लवगा नस्युतत्वाय संग्रहात् ॥२॥ अत एव चाग्नीन्धनाद्यनपेक्षा ॥ संन्यासिनामपि यतो ब्रह्मविद्यान्वयः श्रुतः ॥ अत एव न वि

ध्यानेऽहिनिं दीक्षातन्त्रार्थेक्तिः प्रध्यानगा॥२२॥ नाना
नाथादिभेदात्॥ उपासनानां देहराचाश्रयात्तां
तु भिन्नता॥ परस्पराणपेक्षत्वाच्च धीदीनां च भेद
तः॥२३॥ विकल्पो विशिष्टफलतः॥ कर्मणामिव वि
द्यानां नैष्ठयास्यात्समुच्चयः॥ विकल्पस्त्व किंवा
स्यां मोक्षार्थत्वाविशेषतः॥२४॥ काम्यास्तु यथाकामं
समुच्चीयेरन्नवाद्द्वविकल्पभावात्॥ विकल्पहेतोर्वि
रहे नैरपेक्ष्याच्च कामतः॥ समुच्चयो विकल्पो वा
काम्यानां तु द्विधा भवेत्॥२५॥ अङ्गेषु यथाश्रय
भावः॥ कर्माङ्गाश्रयदृष्टीनां सहभाववस्तु नश्रुतेः।
तासामाश्रयवैच्यत्येव्यवस्थानामपरिग्रहः॥२६॥

श्रवश्रुतेः स्मृतेः ॥८॥ अंतरा चापि तु तद्दृष्टेः ॥ अप्यना
श्रमिणां विद्यास्याद्रैक्वादिषु दर्शनात् ॥ जपादिसंभ
वात्तु रव्यं वाश्रमित्वं तथा स्मृतेः ॥ ९ ॥ तद्भूतस्य तु तन्ना नार
वौ जैमिनेरपि नियमात् तद्रूपाभावेभ्यः ॥ च्युतानां तु
सर्वेषां विद्या नास्त्यूर्द्ध्वरेतसां ॥ निष्कलभावस्मर
14 णाद्विधिनिषेध शिरसानिव ॥१॥ स्वामिनः फलश्रुतेरि
त्यात्रेयः ॥ कृतानां फलिजैवां गोपासनानां फलप्रभोः ।
स परिक्रीयते यस्मात्तस्माज्जिनासांगकर्मतो ॥१॥ सह
कार्यंतरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥
बाल्यपांडित्ययोर्मौनं ततीयं मुनिरित्यतः ॥ सहायपदे
नविड्पौविध्येयो ग्यंक्रियांगवत् ॥१२॥ कृत्स्नभावा

ध्यायः कर्मापेक्षाफलोदये ॥५॥ सर्वापेक्षा च यज्ञादि
श्रुतेरश्ववत् ॥ फले कर्मानपेक्षापि विद्यैव सा तावदपेक्ष
ते ॥ यज्ञादीनि तथा शास्त्रं यथाश्वः प्रेरकं गतौ ॥६॥ श
मदमाद्युपेतः स्यात् तथापि तु तद्विधेस्तदंगतया तेषा
मवश्यानुष्ठेयत्वात् ॥ यथा यज्ञादिकर्माणि तथा
शमदमादयः ॥ मुक्ता मुमुक्षुणा ग्राह्या स्वंगाभावे
न तद्विधेः ॥७॥ सर्वान्नानुमतिश्च प्राणात्यये तद्दर्श
नात् ॥ अन्नं प्राणविदः सर्वं चेति स्यान्नियमश्रु
ते ॥ आपद्येव निषिद्धान्नग्रहणे कैरपि स्मृतिः ॥८॥
विहितत्वाच्चाश्रमकर्मापि ॥ आश्रमार्थं च विद्यार्थं क
र्म यज्ञादिकं भवेत् ॥ एकं तेनानभिमतो विद्याया

श्रयात्॥१७॥इति श्रीब्रह्मसूत्रार्थसंग्रहे तृतीयस्याध्याय
स्य चतुर्थपादः॥४॥ आवृत्तिरसकृदुपदेशात्॥ मुक्तेरस
कृदावृत्तं ब्रह्मज्ञानं तु साधनं॥ ज्ञानोपासनयोरैक्यादुपा
सीतेति च श्रुतेः॥१॥ आत्मेति तूपगच्छन्ति ग्राहयन्ति च॥
स्वमात्मेत्युपगमात्स्वतत्र आत्मेति च श्रुतेः॥ उपास्यः स्वा
त्मभावेन परमात्मा मुमुक्षुभिः॥२॥ न प्रतीके न हि सः॥ म
नो ब्रह्मेत्युपासीतेत्यन्यथोपासने श्रुतेः॥ प्रतीकात्मभावा
त्तेन सोऽन्यस्यादात्मतया मतिः॥३॥ ब्रह्मदृष्टिरुत्कर्षात्॥ ना
मादिभ्यः परत्वेन ब्रह्मत्वेन ब्रह्मभावना॥ नामादिषु कर्त
व्यस्यादमात्ये राजदृष्टिवत्॥४॥ आदित्यादिमतयश्चाङ्ग
उपपत्तेः॥ उद्गीथादिषु कर्माङ्गेष्वादित्यादिधियस्तथा॥

तुरङ्गीयसंहारः॥ गृहस्थेनोपसंहाराच्चोद्योगेनाश्रमां
तरं॥ इति कृत्स्नपक्षचाश्रमस्येसन्दर्शनात्॥१३॥ मौन
वदितरेषामप्युपदेशात्॥ विज्ञानं मौनं सहितं व्यासेना
मेवप्रज्यते॥ इतिचेतरेषां तुबलविद्योपदेशात्॥१४॥
अनाविष्कुर्वन्नन्वयात्॥ उक्तो बाल्येन तिष्ठासेदिलाना
विष्कृतिर्मुनेः॥ स्वगुणानां तत्साहित्यादि चार्थानाव्यवस्थि
तिः॥१५॥ ऐहिकमप्रस्तुतप्रतिबंधे तद्दर्शनात्॥ इष्टार्थो
पासनं न स्यात्साधने सत्यपि द्रुतं॥ प्रतिबंधकसंपत्तौ तथा
लोकेहि दृश्यते॥१६॥ एवं मुक्तिफलानियमस्तदवस्था
वधृतेस्तदवस्थावधृतेः॥ मोक्षार्थोपासनोत्तरस्यैवं
नन्य न स्थितिः॥ एवं तोपि न यं विद्युरियनैकांय नि

ध्येति श्रुतेः ॥१३॥ इतरस्याप्येवमसंश्लेषः पाते तु ॥ ना
शश्लेषावधस्यैव सुकृतस्यापि विद्यया ॥ स्यात् पाते तु
देहस्य विद्याकर्मोपयोगिनः ॥१४॥ अनारब्धकार्ये
एव तु पूर्वे तदवधेः ॥ अप्रवृत्तफले न हि भवतः पूर्व
२८ उक्ते ॥ न त्वारब्धफले तावदेव चिरमिति श्रुतेः ॥
अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ अ
ग्निहोत्रादिसुकृतं विद्याकार्यमपि प्रकृतं ॥ न तस्य
विद्यया नाशस्तानुकूल्यात्फल हि श्रुतेः ॥१६॥ अ
तोऽन्यापि ह्येकेषामुभयोः ॥ देहनाशादविद्याधी
दन्यसदसत्फलकं ॥ न प्राक्श्लिष्टं तु नैव तामिश्रा

द्वलात्मकत्वादादित्याद्युत्कर्षैरुपपद्यते ॥५॥ आसीनः

संभवात् ॥ ध्यानशब्दोदितं बुद्धेरैकाग्र्यमुपासनं

चैकाग्र्यं चाचलस्य स्यादासीनस्य तथा स्मृतौ ॥६॥ य

त्रैकाग्रता तत्राविशेषात् ॥ दिग्देशकालनियमो ना

स्त्युपासनसंग्रहे ॥ ऐकाग्रतातिरेकेणाविशेषश्रुत्य

भावतः ॥७॥ आप्रयाणात्तत्रापि हि दृष्टं ॥ आवृत्तिः पु

नरावृत्त्यामपि स्यादाप्रयाणात्ततः ॥ श्रुतेरिति सर्वत्र

वं वर्तयेत्तावदायुषं ॥८॥ तदधिगम उत्तरपूर्वाघयो

रश्लेषविनाशौ तद्व्यपदेशात् ॥ नाशाश्लेषौ तु विद्या

फलौ स्यातां पूर्वोत्तराघयोः ॥ इह नेतु लवलेशेऽजलव

धर्मप्यतः ॥ ३ ॥ तन्मनः प्राण उत्तरात् ॥ मनः प्राण इति
श्रुत्वा मनोवृत्तिर्विवक्षिता ॥ लयः प्राणे न हि प्राणे मन
सः प्रकृतिर्भवेत् ॥ ३ ॥ सोऽध्यक्षे तदुपगमादिभ्यः ॥
जीवे प्राणस्य संपत्तिः स हि जीवानुगः श्रुतः ॥ तेजःसं
पत्तिवाक्यस्य स्यात् भूतान्तर्निविष्टितैः ॥ ५ ॥ समाना चा
सृत्युपक्रमादमृतत्वं चानुपोष्य ॥ समानाडीप्रवेशात्प्र
गुक्तो विविदज्ञयोः ॥ जीवन्मुक्तिवचो गौणं तत्त्वादेहात
द्रव श्रुतेः ॥ ५ ॥ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ भू
तान्तरयुतं तेजः सूक्ष्मं देहाद्व्रजेन्मुनेः ॥ स्थूलोऽक्तम
तो त्वक्याक्वचित्तेनोपलभ्यते ॥ ६ ॥ प्रतिषेधादिति चे
न्न शारीरात्स्पष्टो ह्येकेषां ॥ उक्तिमत्तिर्न तस्येति निषेधो
च्यतु विशेषतः ॥ न तस्मादिति तेनस्यात्प्राणस्मा

मित्रगते न वेत॥१३॥ यदेव विद्ययेति हि॥ उद्गीथा
द्यंगाविनाभे सति न्यासत्तिविद्यया॥ हेकाथ्यं भवि
हीनादेरपि का[illegible]विशेषतः॥१४॥ भोगेन त्वितरे
क्षपयित्वाथ संपद्यते॥ प्रारब्धकार्ययोः पुण्य
पापयोः फलभोगतः॥ क्षपयित्वा तु विद्वान् ब्रह्म प्रा
प्नोत्यथ श्रुतेः॥१५॥ इति श्रीब्रह्मसूत्रार्थसंग्रहे च
तुर्थस्याध्यायस्य प्रथमः पादः॥१॥ वाङ्मनसि दर्श
नाच्छब्दाच्च॥ तौ वाञ्मनसीयसंवृत्तिलोपे विवक्षि
तः वाच्यो मनस्युपादानेन हि चेतस्तथैव तत्॥१॥
अत एव सर्वाण्यनु॥ वाचोवृत्तिरवाच्येवामि द्वि
यास्तां च वृत्तयः॥ चित्ते लीनाः स्फुरन्ति यो लेवं प्रल

तश्चावनेपि दर्शितौ ॥ अवने दर्शितौ चापि स्यादेहस्य
मुक्तता ॥ योगिनस्स्महरायुक्तिस्मृतौ स्मादेवतापरौ ॥१४॥
इति श्रीब्रह्मसूत्रार्थसंग्रहे चतुर्थस्याध्यायस्य द्विती
यः पादः ॥२॥ अर्चिरादिनातत्प्रथितेः ॥ ब्रह्मप्रेप्सा
हि साविद्यार्चिरादिगतिस्समाश्रुता तन्मरुदग्म
र्के रश्मयो पितदर्शिताः ॥१॥ वायुमब्दादविशेषवि
शेषाभ्यां ॥ अग्निरेवार्चिरहरापूर्यमासोदगब्द
काः ॥ क्रमाद्वायुस्ततः पश्चादादित्यः स्यात्तथा श्रुतेः ।
॥२॥ तडितोधिवरुणः संबंधात् ॥ आदित्याच्चंद्रमा
स्तस्माद्विद्युदेवं तमश्रुतेः ॥ वरुणेंद्रप्रजेशास्तु पश्चा

मनो गतिः ॥७॥ तानि वरेत्तथा स्वाहा ॥ तेजः शक्तौ क्रमेण

तानो स्वदेशात्परमा लिनी ॥ संपत्ति श्रयेद्यावितेवा

गादीनां तथा श्रुतेः ॥८॥ अविभागो वचनात् ॥

जीवस्यैचापि भागेन स्थितिः स्यात्परमालिनि संपत्ति

वचना भेदात्स्वाच्चास्य गति श्रुतेः ॥९॥ तदोको ग्र

ज्वलनं तत्प्रकाशित द्वारो विद्यासामर्थ्यात् तच्छेषग

त्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ ह

दग्रदीप्याद्दशाध्वविद्या सास्या गतिस्ततः ॥ हार्दानु

गृहीतश्चोर्द्ध्वं मोधनाडया मूर्ध्नि व्रजेत् ॥१०॥ रश्म्यनु

सारी ॥ ऊर्द्ध्वं रश्मिभिरेवेति शब्दाद्दहनि चानिशि ॥ ग

च्छेदिवाख्यतो नाडी रश्मिसंबंधतः सदा ॥११॥

२८

श्रुतेर्हि विकल्पस्य तदभावस्य चान्वयात्॥ सिद्धेःप
क्षा वयैः पस्यनश्यति इदं शा हि वताः॥ प्रदीपवदा
वेशः कथा हि दर्शयति॥ विज्ञाने नाधुर्यपाल्लाद्रम
पादीपवद्विशेत॥ देहान्तं कृष्णुचला दर्श्नस्याप
संस्थयोः॥ ॥ जगद्व्यापारवर्ज्यं प्रकरणादसन्निहित
त्वात्॥ मुक्तानां नजगत्कर्तृत्वं ब्रह्मसाम्यतु भोगतः॥
भोगमेषां विकारस्थं नित्यं च प्राप्ततः स्मृतेः॥ ॥ अ
नावृत्तिः शब्दादनावृत्तिः शब्दात्॥ इमं मानवमावर्तं
नावर्तन्त इति श्रुतेः च्युतिर्नैषां हि मुक्तानां भगवान्बा
दरायणः॥ श्रीदारिस्त्येवं विहितेब्रह्मसूत्रार्थसंग्रहेतुरी

संपद्याविर्भावः स्वेन शब्दात् ॥ अभिनिष्पद्यते स्वेन रूपेण ब्रह्मदर्शनात् ॥ इति मुक्तात्मनां सिद्धस्व भावस्फोरणमुच्यते ॥१॥ अविभागेन दृष्टत्वात् ॥ अवैधर्म्येण मुक्तोयं ब्रह्मणा तत्र तिष्ठति ॥ शुद्धे शुद्धं पयासिक्तं जलं तादृगिति श्रुतेः ॥२॥ ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ सर्वज्ञरूपोपि मुक्तात्मा ब्रह्मलक्षणैर्लक्ष्यते ॥ सर्वज्ञत्वादिनाशास्त्रौडुलोमपौरविरोधतः ॥३॥ संकल्पादेव तच्छ्रुतेः ॥ संकल्पादेव पित्रादिप्राप्तिरस्य न यत्नतः ॥ न त्रैलम्साविरोधः स्यात्सत्यसंकल्पताश्रुतेः ॥४॥ अभावं बादरिराह ह्येवं ॥

पाध्यायचरणौ तु शीर्षे भान्ति पर्यन्ता ॥ इति श्रीहय
ग्रीवाश्रमस्य शठकोपमुनेः कृतौ ब्रह्मसूत्रार्थसं
ग्रहे चतुर्थस्य व्याख्यायां चतुर्थपादः ॥ ४ ॥ श्री
१० श्रीपैः नमः श्रीलक्ष्मीहयग्रीवाय नमः श्री (

ब्रह्मसूत्रार्थसंग्रहः॥

वेदान्तसूत्रार्थः

॥ विशिष्टाद्वैतमते॥